UNIVERSITY OF CAMBRIDGE

AET2
Asian and Middle Eastern Studies Tripos, Part II

---

**This is a three hour examination**

---

**Paper MES42**

**Elementary Sanskrit**

*Answer **all** questions. Each question carries 25% of the available marks.*
*In questions 1, 2, and 3 Part A carries 20% and Part B carries 5%.*

*Write your number **not** your name as well as the paper code (MES42) on each page of your submission.*

**SPECIAL REQUIREMENTS TO BE SUPPLIED FOR THIS EXAMINATION**

*Student declaration form*

**SUBMISSION REQUIREMENTS**

*Type your answers and upload them in a document, such as a Word document or PDF.*

*Files should be saved as MES42_[your number].*

*Upload a completed student declaration form as a separate file.*

**The exam will begin as soon as you open the file containing the questions. Once begun you will have three hours to complete the exam.**

1 (a) Translate into English:

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।

न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।

इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।

कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।

शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ८

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।

तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९

*Bhagavadgītā*, ch. 3, vv. 4-9

(b) Comment grammatically on the forms *akarmakṛt*, *kāryate*, *vimūḍhātmā*, and *jyāyo* occurring in the above passage.

2 (a) Translate into English:

वैशंपायन उवाच ।

अनुज्ञातांस्तान्विदित्वा धृतराष्ट्रेण धीमता ।
राजन्दुःशासनः क्षिप्रं जगाम भ्रातरं प्रति ॥ २
दुर्योधनं समासाद्य सामात्यं भरतर्षभ ।
दुःखार्तो भरतश्रेष्ठ इदं वचनमब्रवीत् ॥ ३
दुःखेनैतत्समानीतं स्थविरो नाशयत्यसौ ।
शत्रुसाद्गमयद्द्रव्यं तद्बुध्यध्वं महारथाः ॥ ४
अथ दुर्योधनः कर्णः शकुनिश्चापि सौबलः ।
मिथः संगम्य सहिताः पाण्डवान्प्रति मानिनः ॥ ५
वैचित्रवीर्यं राजानं धृतराष्ट्रं मनीषिणम् ।
अभिगम्य त्वरायुक्ताः श्लक्ष्णं वचनमब्रुवन् ॥ ६

दुर्योधन उवाच ।

न त्वयेदं श्रुतं राजन्यज्जगाद बृहस्पतिः ।
शक्रस्य नीतिं प्रवदन्विद्वान्देवपुरोहितः ॥ ७

*Mahābhārata*, 2.66, vv. 2-7

(b) Comment grammatically on the forms *dhīmatā*, *abravīt*, *nāśayati*, and *mahārathāḥ* occurring in the above passage.

3 (a) Translate into English:

The lion, the old hare, and the well

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। स च सर्वदा पशूनां वधं विदधान एवास्ते। ततः सर्वैः पशुभिर्मेलकं कृत्वा स सिंहो विज्ञप्तः। देव। किमर्थं सर्वपशुवधः क्रियते। वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः। सिंहेनोक्तम्। यद्येतदभिमतं भवतां तर्हि भवतु। ततः प्रभृति प्रत्यहमेकैकं पशुमुपकल्पितं भक्षयन्नास्ते। अथ कदा चित्कस्यापि वृद्धशशकस्य वासरः प्राप्तः। ततः सोऽचिन्तयत्।

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे॥

तन्मन्दं मन्दमुपगच्छामि। ततः सिंहोऽपि क्षुधा पीडितः कोपात्तमुवाच। कुतस्त्वं विलम्ब्यागतोऽसि।

*Hitopadeśa*, excerpt from sections 8-9 in Lanman edition

(b) Comment grammatically on the forms *vidadhāna*, *vijñaptaḥ*, *pratyaham*, and *jīvitāśayā* occurring in the above passage.

4 Translate into English:

The story of Kālidāsa

भारतदेशे पुरा कालिदासो नाम महाकविर्बभूव । तस्येयं कथा श्रूयते । तरुणः कालिदास उज्जयिनीनगरेऽवसत् । तस्य बुद्धिर्नासीदेव । किन्तु स सुरूपोऽभवत् । एकदा राजा राजकन्यायाः विवाहः कार्य इत्यघोषयत् । यो नरः सर्वेषु जनेषु पण्डिततमो भवेत्तस्मै राजकन्या प्रदीयेत । केचिद्दुर्जना राजकन्यां प्रति गत्वा तामेवमकथयन् - हे राजकन्ये, नगरेऽस्मिन् कालिदासो नाम महापण्डितो निवसति । स एव तव पतिर्भवतु । तेन सह तव जीवितं सुखमयं भवेदिति । तद्वचनं श्रुत्वा सा राजकन्या कालिदासमेवाचिन्तयत् । नान्यं पुरुषम् । अन्ते च तस्याः कालिदासेन सह विवाहो जातः । अपि तु कालिदासो महान् अपण्डित इति सा विवाहादनन्तरमबोधत् । सा कालिदासमवदत् - रे मूर्ख, मा मां स्पृश । नाहमिच्छामि त्वामपण्डितं द्रष्टुम् । यत्र क्वापि गच्छेति । ततः कालिदासस्तन्नगरं त्यक्त्वा वनं गतः । वने च स कालीदेव्या मन्दिरमपश्यत् । तत्र स देव्या भक्तिं चकार । बहुना कालेन प्रसन्ना देवी तस्मै बुद्धिं प्रायच्छत् । एवं देव्याः प्रसादेन स महाकविर्बभूव । तस्मात्तं जनाः कालिदास इति वदन्ति ।

Glossary for the unseen passage

| | |
|---|---|
| purā = once upon a time | re = hey (exclamation) |
| Kālidāsa = name of a poet | mūrkha = fool |
| taruṇa = young | Kālī = name of a goddess |
| sarūpa = handsome | prasanna = pleased |
| vivaha = wedding | prayam = to give |
| ghuṣ = to announce | prasāda = grace |
| sukhamaya = happy | |
| anantaram = after | |

**END OF PAPER**